मनि यूनः, परिणतानपीच्छामो दृष्ट्वा, परिणयविधानस्थितिरियम् । त्वयारब्धं जन्म क्षपयितुमकाण्डेन विधिना न नो गोत्रे पुत्रि ! क्वचिदपि सतीलाञ्छनमभूत्" तदेतन्निषेधरूपम् निषिद्धविषयमाप्तवचनमसतीवचनरूपम् ।

२६ आशीः "आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा" । दण्डी "पातु वः परमं ज्योतिरवाङ्मनसगोचरम्" ।

२७ उत्तरम् "किञ्चिदाकूतसहितं यद्गूढोत्तरमुत्तरम्" च० । 'यत्रासौ वेतसो पान्थ ! तत्रासौ सुतरा सरित्" ।

२८ उत्प्रेक्षा "सम्भावनाः स्युरुत्प्रेक्षावस्तुहेतूद्भवाः पुनः । उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे" । च० "धूमस्तोमं तमः शङ्के कोकीविरहशालिनाम्" "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" "रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्" । "त्वन्मुखाभेच्छया नूनं पद्मं वैरायते शशी" "मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः" "प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति" । दर्पणे तु अन्यथा विभज्य उदाहृतम् यथा "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना । वाच्या प्रतीयमाना सा प्रथमं विविधा मता वाच्येवादिप्रयोगे स्यादप्रयोगेऽपरा पुनः । जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि । तदष्टधापि प्रत्येकं भावाभावाभिमानतः । गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः । द्वात्रिंशद्विधतां यान्ति" । तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रं यथा ॥ "ऊरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलोभाति । सपताकः कनकमयोविजयस्तम्भः स्मरस्येव" ॥ अत्र विजयस्तम्भस्य जातिवाचकत्वाज्जात्युत्प्रेक्षा ॥ "ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव" ॥ अत्र सप्रसवत्वं गुणः ॥ "गङ्गाम्भसि सुरत्राण ! कृपाणस्तव निःस्वनः । स्नातीवारिवधूवर्गगर्भपातनपातकी" ॥ अत्र स्नातीति क्रिया ॥ "मुखमेणीदृशोभाति पूर्णचन्द्र इवापरः" ॥ अत्र चन्द्र इत्येकव्यक्तिवाचित्वाद्द्रव्यम् । एते भावाभिमाने च । अभावाभिमाने यथा ॥ "कपोलफलकावस्य कष्ठं भित्त्वा तथाविधौ । अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ" ॥ अत्रापश्यन्ताविति क्रियाया अभावः । एवमन्यत् । निमित्तस्य गुणक्रियारूपत्वे यथा गङ्गाम्भसीत्यादौ स्नातीवेत्युत्प्रेक्षानिमित्तं पातकित्वं गुणः । अपश्यन्ताविवेत्यादौ क्षामतागमनरूपं निमित्तं क्रिया एवमन्यत् । प्रतीयमानोत्प्रेक्षा यथा ॥ "तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम् । हाराय गुणिने स्थानं न दत्तमिति लज्जया" ॥ अत्र लज्जयेवेति इवाद्यभावात् प्रतीयमानोत्प्रेक्षा एवमन्यत् । अत्र वाच्योत्प्रेक्षायां षोडशसु भेदेषु मध्ये विशेषमाह "तत्र वाच्याभिदाः पुनः । विना द्रव्यं त्रिधा सर्व्वाः स्वरूपफलहेतुगाः" तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षयोः षोडशभेदास्तेषु जात्यादीनां त्रयाणां ये द्वादशभेदास्तेषां प्रत्येकं स्वरूपफलहेतुगतत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः द्रव्यस्य स्वरूपोत्प्रेक्षणमेव संभवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः । अत्र स्वरूपोत्प्रेक्षा यथा पूर्व्वोदाहरणेषु "स्मरस्य विजयस्तम्भ" इति सप्रसवा इवेत्यादयः जातिगुणरूपाः । फलोत्प्रेक्षा यथा ॥ "रावणस्यापि रामास्तोभित्त्वा हृदयमाशुगः । विवेश भुवमाख्यातुमुरगेभ्यइव प्रियम्" ॥ अत्राख्यातुमिति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम् ॥ हेतूत्प्रेक्षा यथा ॥ "सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् । अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्" ॥ अत्र दुःखरूपो गुणोहेतुत्वेनोत्प्रेक्षितः । एवमन्यत् । "उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः" । तेषु चत्वारिंशत्संख्याकेषु भेदेषु मध्ये ये स्वरूपगायाः षोडश भेदास्ते उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्पञ्चाशद्भेदा वाच्योत्प्रेक्षायाः । तत्र निमित्तस्योपादाने यथा पूर्व्वोदाहृते स्नातीवेत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तम् । अनुपादाने यथा "चन्द्र इवापरः" इत्यत्र तथाविधसौन्दर्य्यातिशयोनोपात्तः । हेतुफलयोस्तु नियमेन निमित्तस्योपादानमेव तथाहि विश्लेषदुःखादिवेत्यत्र यन्निमित्तं बद्धमौनत्वम्, आख्यातुमिवेत्यत्र च भूप्रवेशस्तयोरनुपादाने असङ्गतमेव वाक्यं स्यात् । प्रतीयमानायाः षोडशसु भेदेषु विशेषमाह "प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः" । यथोदाहृते तन्वङ्ग्यास्तनयुग्मेनेत्यत्र लज्जयेवेति हेतुरुत्प्रेक्षितः अस्यामपि निमित्तस्यानुपादानं न सम्भवति इवाद्यनुपादाने निमित्तस्य च कीर्त्तने उत्प्रेक्षणस्य प्रमातुर्निश्चेतुमशक्यत्वात् । स्वरूपोत्प्रेक्षाप्यत्र न भवति धर्म्म्यन्तरतादात्म्यनिबन्धनायामस्यामिवाद्यप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात् यथा ॥ "अयं राजाऽपरः पाकशासन" इति ॥ विशेषणाभावे च रूपकस्य, यथा "राजा पाकशासन" इति तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा । 'उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा" । ता उत्प्रेक्षाः । उक्तौ यथा ॥ 'ऊरुः कुरङ्गकदृश" इति ॥ अनुक्तौ यथा